अनुक्रमांकः ..................................

निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MAS 203**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2018**

**एम.ए. संस्कृतम्, (सत्रम् : द्वितीयम्)**

**भारतीयदर्शनम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. आचार्य-ईश्वरकृष्णदृशा करणानां परिचयो दीयताम्।
2. साङ्ख्यकारिकामनुसृत्य सर्गस्य स्वरूपं साधु सन्दर्श्यताम्।
3. संयमस्य स्वरूपमुपवर्ण्य तस्यान्तरङ्गबहिरङ्गभावौ पतञ्जलिदृशा प्रतिपाद्येताम्।
4. पातञ्जलयोगसूत्रमाधृत्य कैवल्यस्य स्वरूपं विशदं विविच्यताम्।
5. सर्वमतसङ्ग्रहमनुसृत्य प्रत्यक्षप्रमाणं सविस्तरमुल्लिख्यताम्।

## खण्ड-ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवलं चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. अधस्तनकारिका सप्रसङ्गं विशदं व्याख्यायताम् –
   सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः।
   सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम्॥
2. आध्यात्मिक्यश्च तिस्रः प्रकृत्युपादानकालभाग्याख्याः।
   बाह्या विषयोपरमात् पञ्च नव तुष्टयोऽभिहिताः॥
   इतिकारिकाया आशयः सम्यक् स्पष्टीक्रियताम्॥
3. धर्मलक्षणावस्थापरिणामानां स्वरूपं साधु सन्दश्यताम्।
4. "कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्।"
   इति सूत्रस्य तात्पर्यं प्रकट्यताम्।
5. सर्वमतसङ्ग्रहरीत्या अनुमानप्रमाणं विधिवद् विविच्यताम्।
6. ब्रह्मणो द्वैविध्यमभिधाय मीमांसाशास्त्रस्य परिचयो दीयताम्।

## खण्ड–ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः** 'ग' खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×0.5=05)**

1. सांख्यकारिकाया लेखकोऽस्ति ..............................
   (अ) विज्ञानभिक्षुः (ब) ईश्वरकृष्णः
   (स) माठरः (द) वाचस्पतिमिश्रः
2. सांख्यदर्शनं प्रणीतमस्ति ..............................
   (अ) शङ्कराचार्येण (ब) पतञ्जलिना
   (स) कपिलेन (द) वात्स्यायनेन
3. साङ्ख्यमते तत्त्वज्ञानान्मोक्षो भवति ..............
   (अ) विंशतेः (ब) अष्टाविंशतेः
   (स) पञ्चविंशतेः (द) विंशतेः
4. 'दुःखत्रयाभिघातात्' इत्यत्र 'अभिघात' शब्दस्यार्थोऽस्ति ............
   (अ) शब्दजनकसंयोगः (ब) बन्धजनकसंयोगः
   (स) ताडनम् (द) कोऽपि न
5. योगसूत्राणां रचयिता अस्ति ..............................
   (अ) कणादः (ब) कपिलः
   (स) काशकृत्स्नः (द) पतञ्जलिः
6. योगसूत्रद्वितीयपादस्य नामास्ति ..............................
   (अ) साधनपादः (ब) समाधिपादः
   (स) विभूतिपादः (द) कैवल्यपादः
7. सांख्यकारिकाणां संख्याऽस्ति ..............................
   (अ) सप्ततिः (ब) शतम्
   (स) अष्टौ (द) द्विसप्ततिः
8. साङ्ख्ययोगमते प्रमाणानां सङ्ख्याऽस्ति ..............................
   (अ) चत्वारि (ब) अष्टौ
   (स) त्रीणि (द) षट्
9. 'देशबन्धश्चित्तस्य धारणा' इति सूत्रे देशशब्दस्य तात्पर्यमस्ति ...............
   (अ) उच्चारणम् (ब) प्रदेशः
   (स) अङ्गम् (द) आदेशः
10. 'केवलं प्रत्यक्षमेव प्रमाणम्' इति मनुते ..............................
   (अ) लोकायतिकः (ब) माध्यमिकः
   (स) आर्हतः (द) मीमांसकः

---------------x---------------